Topic 22 स्वादिगण गुरु स्मृत – 2

**एकाच उपदेशेऽनुदात्तात् ।**

उपदेशे यो धातुरेकाजनुदात्तश्च तत आर्धधातुकस्येण् न ।

( ऊद् – ॠदन्तैर्यौति – रु – क्ष्णु – शी – स्नु – नु – क्षु – श्वि – डीङ् – श्रिभिः ।

वृङ् – वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ।

कान्तेषु – शक्लृ एकः । चान्तेषु – पच् मुच् – रिच् – वच् विच् – सिच् षट् ।

छान्तेषु – प्रच्छ् एकः । जान्तेषु – त्यज् – निजिर् – भज् – भञ्ज् – भुज् – भ्रस्ज् – मस्ज् यज् – युज् – रुज् – रञ्ज् विजिर् – स्वञ्ज् – सञ्ज् सृज् पञ्चदश

दान्तेषु – अद् – क्षुद् – खिद् – छिद् – तुद् – नुद् – पद्य – भिद् – विद्यति विनद् – विन्द् – शद् – सद् – स्विद्य – स्कन्द् – हद् षोडश । धान्तेषु – क्रुध् क्षुध् – बुध्य – बन्ध् – युध् – रुध् राध् – व्यध् – शुध् – साध् – सिध्य । एकादश । नान्तेषु – मन्य हनौ द्वौ । पान्तेषु – आप् – छुप् – क्षिप् – तप् – तिप् – तृप्य – दृप्य – लिप् – लुप् वप् शप् – स्वप् – सृप् त्रयोदश । भान्तेषु – यभ् – रभ् – लभस्त्रयः । मान्तेषु – गम् नम् – यम् – रमश्चत्वारः । शान्तेषु क्रुश् – दंश् – दिश् – दृश् – मृश् – रिश्, रुश् – लिश् – विश् – स्पृशो दश । षान्तेषु – कृष् – त्विष् – तुष् द्विष्, दुष् – पुष्य – पिष् – विष् – शिष् – शुष् – श्लिष् एकादश । सान्तेषु – घस् – वसती द्वौ । हान्तेषु – दह् – दिह् – दुह् – नह् – मिह् – रुह् – लिह् – वहोऽष्टौ । अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम्

गोपायाञ्चकर्थ, गोपायाञ्चक्रथुः गोपायाञ्चक्र।
गोपायाञ्चकार, गोपायाञ्चकर। गोपायाञ्चकृव,
गोपायाञ्चकृम। गोपायाम्बभूव। गोपायामास।
जुगोप, जुगुपतुः जुगुपुः।

स्वरति - सूति - सूयति - धूञूदितो वा।
स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्
वा।

जुगोपिथ, जुगोप्थ। गोपायिता। गोपिता, गोप्ता।
गोपायिष्यति, गोपिष्यति, गोप्स्यति। गोपायतु। अगोपा-
यत्। गोपायेत्। गोपाय्यात, गुप्यात्। अगोपायीत्

स्वृ, षूङ्, षूङ् धूञ् और ऊदित्
धातुओं के पश्चात् वलादि आर्धधातुक को
विकल्प से 'इट्' आगम होता है। उदाहरण के लिए
'गुपू' धातु का दीर्घ ऊकार इत् हुआ है। अतः
ऊदित् होने के कारण इसके आगे वलादि आर्धधातुक
को विकल्प से 'इट्' होता है। लिट् के प्रथम-पुरुष
के बहुवचन में जुगोपथ रूप बनने पर वलादि
'थ' आर्धधातुक परे होने के कारण विकल्प से
इट् होकर 'जुगोपिथ' रूप बनता है। अभाव पक्ष
में 'जुगोप्थ' ही रहेगा।

नोट।
इडाहो सिचि हलन्तस्य वृद्धिर्न। अगोपीत्।
अगौप्सीत्।
झलो झलि। झलः परस्य सस्य लोपो झलि। अगौप्ताम्, अगौप्सुः।
अगौप्सीः अगौप्तम्, अगौप्त। अगौप्सम्, अगौप्स्व, अगौप्स्म,
अगोपायिष्यत, अगोपिष्यत अगौप्स्यत्। क्षि क्षये। क्षयति।
चिक्षाय, चिक्षियतुः, चिक्षियुः। एकाचः - इति निषेधे
प्राप्ते-